दूतप्रतिवचनम्

(काव्यम्)

प्रणेता

डा० इच्छारामद्विवेदी

१९८९

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली-११० ०५९

ग्रन्थाङ्कः—६३

दूतप्रतिवचनम्

(संस्कृतकाव्यम्)

प्रणेता :

डा० इच्छाराम द्विवेदः

एम०ए०, पीएच०डी०, पुराणाचार्यः

पुराणेतिहासविभागाध्यक्षः

श्रीएकरसानन्दसंस्कृतमहाविद्यालयः,

मैनपुरी (उ०प्र०)-२०५००१

१९८९

प्रकाशिका

देववाणी-परिषद्, दिल्ली

वाणी-विहारः, नयी दिल्ली-११००५६

(भारतम्)

दूतप्रतिवचनम्
(संस्कृतकाव्यम्)

लेखकः : द्विवेदः, इच्छाराम:

प्रकाशकः : देववाणी-परिषद्,दिल्ली
६, वाणी-विहारः, नई दिल्ली-११००५९

मुद्रकः : प्रवीण प्रिंटिंग सर्विस
३५, टी एक्स्टैंशन उत्तम नगर,
नयी दिल्ली-११००५९

संस्करणम् : प्रथमम् १९८९ ई०

मूल्यम् : विंशतिरूप्यकाणि रु० २०-००

DŪTAPRATIVACANAM
(Sanskrit Poetry)

Author : Dwivedi Dr. Ichchha Ram

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printer : Parveen Printing Service
35, T Extn., Uttam Nagar,
New Delhi-110059

Edition : First 1989

Price : Rupees Twenty Only Rs. 20-00

प्रास्ताविकम्

'देववाणी-परिषद्, दिल्ली'ति संस्थाया उद्देश्येषु संस्कृतग्रन्थानां प्रकाशनमप्यन्यतममस्ति। तदनुसारमद्यावधि परिषदा द्वाषष्टि (६२)-ग्रन्थानां प्रकाशनमनुष्ठितम्। इदानीञ्च परिषदा त्रिषष्टितमग्रन्थरूपेण डा० इच्छाराम-द्विवेदप्रणीतं **'दूतप्रतिवचनं'** प्रकाश्यते।

ग्रन्थकर्तुः परिचयः पृथक् पृष्ठे दीयते। अत्र **'दूतप्रतिवचन'**मधिकृत्य किञ्चिन्निवेद्यते।

महाकविकालिदासप्रणीतमेघदूतमनुसृत्य नैकैः कविभिः स्वरचनाः प्रणीताः। केनचित् कविना मेघदूतस्य प्रत्येकपंक्तिः समस्यापूर्तिरूपेण स्वकाव्ये प्रयुक्ता, अपरेण मदाक्रान्ताच्छन्दसि विविधाः पदार्था दूतत्वेनोत्प्रेक्षिताः। श्रीमता इच्छारामद्विवेदमहाभागेन **दूतप्रतिवचने** अपरमेव वैशिष्ट्यं संयोजितम्। अनेन महानुभावेन मन्दाक्रान्तावृत्ते दूतभूतस्य मेघस्य मुखेन स्वकालस्य हास्यव्यङ्ग्यकरं वर्णनमुपस्थापितम्। मन्ये प्रयोगोऽयं नावीन्यं धारयत्येव। अस्य काव्यस्यास्वादनाय परीक्षणाय च सहृदया विद्वांसश्च सादर-माहूयन्ते। युवायं कविरन्याः प्रौढा रचना अपि रचयत्विति परमेशः प्रार्थ्यते।

डा० इच्छारामद्विवेदस्य सत्प्रयत्नैरद्य मैनपुर्यां समायोजिते देववाणी-परिषद एकादशे द्वादशे च संयुक्ते वार्षिकाधिवेशनेऽस्य काव्यस्य समुन्मीलनं भवतीति मैनपुरीस्था सहृदयमण्डली सविशेषं वर्धाप्यते दूतप्रतिवचनकारश्चा-भिनन्द्यते।

देववाणी-परिषदः
एकादशं द्वादशं च संयुक्तमधिवेशनम्
२४.१२.१९८९ ई०

(डा० रमाकान्त शुक्लः)
महासचिवः, देववाणी-परिषद्, दिल्ली
आर ६ वाणी-विहारः, नयी दिल्ली-११००५९

किञ्चिन्निवेदनम्

सुरभारतीरसिकानां करसरोरुहेषु **'दूतप्रतिवचन'**मितिनामधेयं काव्यमिदं समायातीति नितरां मोमुदीति मे चेतः। अद्यत्वे संस्कृतसाहित्ये व्यङ्ग्य-काव्यानां प्रचुरप्रचारो नास्तीति दृष्ट्वैव नैकशो मे विचारोऽयं समुद्भूतो यत् किमपि नूतनं व्यंग्यकाव्यं प्रकाशनीयम्। अथ चाध्ययनकालादेव कविता-कामिनीकान्तस्य कविकुलगुरोः कालिदासस्य मेघदूतं समेषां संस्कृतप्रणयिनामिव ममापि चित्तमाचकर्ष। तेनैवाकर्षेण प्रतिबद्धोऽहं बालचापल्यवशात् कानिचित् पद्यानि व्यरचयम्। १९८९ तमेशवीयेऽब्दे अप्रेलमासे कर्णपुरीयसंस्कृतसम्मेलने डा० रमाकान्तशुक्लमहाभागानां सान्निध्ये काव्यस्यास्य कानिचित्पद्यानि मया पठितानि। तैरुत्साहितोऽहं कतिपयैरेवाहोभिर्लघुकाव्यमिदं पूरयित्वा तेषां पुरः स्थापितवान्। तैरिदं काव्यं देववाणी-परिषदा प्रकाशनीयत्वेन वृतम्। तेषामुपकारभारं शिरसा वहामि।

प्रथमेयं कृतिः। सन्त्यत्र दोषाः, परं विद्वज्जना बालप्रयासमिति मत्वा तान्निराकृत्य ममोत्साहं वर्धयिष्यन्तीति विश्वसिमि।

अन्ते च संस्कृतसेवापरायणानामस्मत्पितृचरणानामाचार्यश्रीलालविहारि-द्विवेदमहाभागानां मातृचरणानां श्रीमतीनां कृष्णादेवीमहाभागानां च करकमलेषु पुस्तकमिदं समर्पयन समेषां तेषां विद्वन्मणीनां कृते पौनःपुन्येन कृतज्ञतां ज्ञापयामि यैरिदं पठित्वैतद्विषये स्वविचाराः प्रस्तोष्यन्ते।

मैनपुरी
दीपावली
२९.१०.१९८९
रविवासरः

विदुषां वशंवदः
द्विवेद इच्छारामः

दूतप्रतिवचनम्

(प्रणेता—डा० इच्छाराम द्विवेदी, पुराणोतिहासविभागाध्यक्षः
श्रीएकरसानन्दसंस्कृतविद्यालय, मैनपुरी-२०५००१ उ०प्र०)

[१]

वर्षान्तेऽसौ कविकुलगुरोः प्रेषितो मेघदूतः,
प्रत्यागच्छद् विदितचरितो मित्रभार्यागृहस्य ।
उत्कं यक्षं प्रियतमजने दृयायतोच्छ्वासयुक्तं,
मन्दं गर्जन् रघुवरगिरौ हालकाख्यापुरीतः ।।

(१)

अन्वय—हा ! कविकुलगुरोः प्रेषितः, सः, मेघदूतः, अलकाख्यापुरीतः, मित्रभार्यागृहस्य, विदितचरितः, मन्दं, गर्जन्, रघुवरगिरौ, प्रियतमजने, आयतोच्छ्वासयुक्तम्, उत्कं, यक्षं प्रति, वर्षान्ते, आगच्छत् हि ।

(१)

अर्थ—हा ! कविकुलगुरु कालिदास का भेजा हुआ (आज्ञाकारी) वह मेघरूपी दूत अलका नगरी से मित्र (यक्ष) पत्नी के वृतान्त से अवगत होकर (दुःख से कराहता हुआ सा) मन्द मन्द गरजता हुआ रामगिरि पर्वत पर अपनी प्रियतमा का स्मरण कर लम्बी लम्बी आहें भर रहे उत्कण्ठित यक्ष के पास वर्षा की समाप्ति पर लौट कर आया ।

[२]

दृष्ट्वाकाशे स्फटिकविमले मेघखण्डं तदेकं,
प्रीतो यक्षो मधुरवचसा स्वागतं व्याजहार।
प्रायः स्तौति स्वजनमिलनं जीवलोकः समोऽयं,
वीक्ष्योत्तालो भवति सहसा पूर्णचन्द्रं समुद्रः ॥

(२)

अन्वय—यक्षः, स्फटिकविमले, आकाशे, तत्, एकं, मेघखण्डं दृष्ट्वा, प्रीतः (सन्), मधुरवचसा (तस्मै), स्वागतं, व्याजहार। प्रायः, अयं, समः, जीवलोकः, स्वजनमिलनं, स्तौति, समुद्रः, पूर्णचन्द्रं, वीक्ष्य सहसा, उत्तालः, भवति।

(२)

अर्थ—यक्ष ने स्फटिक सदृश निर्मल आकाश में उस असाधारण (प्रिय) मेघखण्ड को देखकर प्रसन्नता से उसका स्वागत किया। सत्य है, सम्पूर्ण प्राणिवर्ग अपने मित्र से मिलकर प्रसन्न होता है (अथवा मित्र मिलन की प्रशंसा करता है), समुद्र पूर्णिमा के चन्द्र को देखकर सहसा उद्वेलित हो उठता है।

[३]

—यक्ष उवाच—

दृष्टा किं ते सुभग ! मृदुला सा मृगाक्षी कदाचिद्,
भर्तुर्गेहे दिवसगणनातत्परा भ्रातृजाया ।
अन्यत्सर्वं कथय जलभृत् किन्नु वृत्तं तदानीं,
मार्गे दृष्टं बहुपुरयुतं भारतं तच्च कीदृक् ।।

(३)

अन्वय—सुभग जलभृत् ! सा, मृदुला, मृगाक्षी, भर्तुः, गेहे, दिवसगणनातत्परा, भ्रातृजाया, किं, ते, कदाचिद्, दृष्टा (अभूत्), अन्यत्, तदानीं, किं, नु, वृत्तम्, मार्गे, बहुपुरयुतं, भारतं, दृष्टम् तत् च कीदृक् (इति) सर्वं, कथय ।

(३)

यक्ष ने कहा—

अर्थ—हे प्रिय मेघ ! क्या तुम उस कोमलांगी, मृगनेत्री मेरी प्रियतमा को देख सके जो मेरे घर पर (मेरे लौटने के) दिनों की गणना में संलग्न रहा करती है । वह तुम्हारी प्रिय भाभी है (उसके देखने में संकोच कैसा ?) और उस समय क्या बातें हुई ? मार्ग में अनेक नगरों से युक्त भारत वर्ष को भी देखा होगा, वह कैसा है यह सब मुझसे कहो ।

[४]

धूमज्योतिःसलिलमरुतां सन्निपातस्तदानीम्,
स्मृत्वा सर्वं विकलकरणं भूरिभावानुयातम् ।
कान्तोदन्तं मलिनचरितं भारतस्यापि वृत्तम्,
वाष्पं मुंचञ्छिथिलवचनैः सोऽभ्यधान्मेघदूतः ॥

(४)

अन्वयः—तदानीं, धूमज्योतिःसलिलमरुतां, सन्निपातः, सः मेघदूतः, भूरिभावानुयातम्, विकलकरणं, सर्वं, कान्तोदन्तं, मलिनचरितं, भारतस्यापि, वृत्तं, (च) स्मृत्वा, वाष्पं, मुञ्चन्, शिथिलवचनैः (इति) अभ्यधात् ।

(४)

अर्थ—तब धूम, प्रकाश, जल एवं वायु का संघात वह मेघ रूपी दूत विविध प्रेमभावों से युक्त (किन्तु वियोग के कारण) इन्द्रियों को व्याकुल कर देने वाले प्रियतमा के सभी समाचारों का एवं दुःखमय भारत के वृतान्त का स्मरण कर आँसू गिराते हुए अनुत्साहपूर्ण वचनों से इस प्रकार कहने लगा ।

[५[

मेघ उवाच

बन्धो ! हन्त त्रुटितमधुना धर्मचक्रं समन्ताद्,
भिन्नः सेतुः प्रणयसरितो यस्त्वया बद्धपूर्वः ।
साधो सर्वं शिथिलमभवत् स्नेहजातं प्रियाणां,
क्षीणे स्नेहे ज्वलति विकला वर्तिका नात्र चित्रम् ॥

(५)

अन्वय—बन्धो ! हन्त ! अधुना, धर्मचक्रं, समन्तात्, त्रुटितम्, यः, त्वया, बद्धपूर्वः, प्रणयसरितः (स) सेतुः, भिन्नः । साधो ! प्रियाणां सर्वं, स्नेहजातं, शिथिलम्, अभवत् । स्नेहे क्षीणे (सति) वर्तिका विकला (सती) ज्वलति, अत्र चित्रं न ।

(५)

मेघ बोला—

अर्थ—वन्धुवर, दुःख है, अव (प्रचलित) धर्म परम्परा सब प्रकार से छिन्न-भिन्न हो गयी है । प्रेम-रूपी नदी पर जिस (विश्वास) सेतु को तुमने बनाया था वह भी नष्ट हो गया है । अब प्रियजनों का सारा स्नेह शिथिल पड़ गया है । तेल के अभाव में बेचारी वर्तिका जल जाती है इसमें आश्चर्य ही क्या है । (इसी प्रकार प्रियतम के स्नेह से रहित होकर प्रियतमा का जीवन भी नष्ट हो जाता हैं यह स्वाभाविक ही है) ।

[६]

त्यक्त्वा सौधं तव प्रणयिनः सा प्रिया ते कृशांगी,
पित्रोर्गेहे वसति रुदितोच्छूननेत्रा तथा ताम् ।
श्वश्रूरोगो दहति सततं कामिनीनां मृदूनां,
चित्तं भग्नं भवति झटिति प्राप्य श्वश्रूदुरुक्तिम् ॥

(६)

अन्वय—सा, ते, कृशांगी, प्रिया, तव, प्रणयिनः, सौधं, त्यक्त्वा, पित्रोः, गेहे, रुदितोच्छूननेत्रा (सती) वसति । तथा (सतीम्) तां श्वश्रूरोगः, सततं दहति । हि, मृदूनां, कामिनीनां, चित्तम्, श्वश्रूदुरुक्तिम् प्राप्य, झटिति, भग्नं, भवति ।

(६)

अर्थ—वह तुम्हारी (वियोगपीड़िता) कृशांगी प्रियतमा तुम प्रेमी के घर को छोड़कर अपने माता-पिता के घर (जाकर) रहने लगी है। बेचारी की (तुम्हारी स्मृति में) रोते-रोते आंखें सूज गयी हैं इस स्थिति में भी उसे अपनी सास का रोग निरन्तर जलाता रहता है। सच है, कोमल (स्वभावा) स्त्रियों का हृदय सास की जली कटी बातें सुनकर अति शीघ्र भग्न हो जाता है।

[७]

गत्वा मातुः सदनमपि सा निर्वृतिं नैव लेभे,
अन्वेष्टुं हा जठरभरणीं जीविकां निर्गताभूत् ।
मार्गे चेटैरशुभचरितैर्निन्द्यशब्दैश्च हासै-
राक्षिप्ता सा विनतवदना दीनतामाप दीर्घाम् ।।

(७)

अन्वय—सा, मातुः सदनम्, अपि, गत्वा, निर्वृतिम्, नैव, लेभे, हा (अतः सा) जठरभरणीं, जीविकाम्, अन्वेष्टुम्, निर्गता, अभूत् । मार्गे, अशुभचरितैः, चेटैः, निन्द्यशब्दैः, हासैः, च, आक्षिप्ता, सा, विनतवदना (सती), दीर्घाम्, दीनताम्, आप ।

(७)

अर्थ—माँ के घर जाकर भी उसे शान्ति प्राप्त न हुई, अतः वह उदरभरण के लिए किसी जीविका को खोजने के लिए निकल पड़ी, परन्तु कष्ट है, रास्ते में दुष्ट स्वभाव वाले कामी पुरुषों के द्वारा अश्लील शब्दों से एवम् उपहासों से उस पर आक्षेप किया गया, इससे उसने नीचे मुख कर लिया और उसे भारी ग्लानि हुई ।

[८]

मार्गे यान्तीं रसिकयुवका वासनादूषितान्ताः,
निन्द्याश्लीलप्रचुरवचनैस्तां सतीं हा क्षिपन्ति।
आस्थाहीना कुटिलचरिता भारतीया प्रजेयं,
सर्वं दृष्ट्वाचरति न हि सा तस्य दोषस्य शान्त्य ॥

(८)

अन्वय—हा ! वासनादूषितान्ताः, रसिकयुवकाः, मार्गे, यान्तीं, तां, सतीं, निन्द्याश्लीलप्रचुरवचनैः, क्षिपन्ति। आस्थाहीना, कुटिलचरिता, इयं सा भारतीया, प्रजा सर्वं, दृष्ट्वा (अपि), तस्य दोषस्य, शान्त्यै, न, आचरति, हि।

(८)

अर्थ—कष्ट है, (काम) वासना से दूषित अन्तःकरण वाले, रसिक युवक मार्ग में जा रही उस सती नारी पर निन्दनीय एवम् अश्लीलता बहुल शब्दों के द्वारा आक्षेप करते हैं। और यह भारत वर्ष की प्रजा भी (आदर्श के प्रति) ऐसी आस्थाहीन एवं बेढंगे चरित्र की हो गयी है कि सब कुछ देखकर भी वह उस बुराई के निवारण के लिए कुछ भी नहीं करती।

[९]

तन्वी श्यामा शिखरिदशना यक्षिणी या त्वदीया,
टी० वी० मध्ये चपलनयना तारिका दृश्यते सा।
कान्ते स्वाङ्गे विमलवटिकं फेनिलं लिम्पमाना,
स्नान्त्युन्मुक्ता भवति विविधक्रय्यवस्तुप्रचारे ॥

(९)

अन्वय—या, त्वदीया, तन्वी, श्यामा, शिखरिदशना, यक्षिणी, (आसीत् अधुना) सा टी० वी० मध्ये चपलनयना तारिका, दृश्यते विविधक्रय्यवस्तु प्रचारे (च, सा) कान्ते, स्वाङ्गे विमलवटिकं फेनिलं लिम्पमाना, स्नान्ती, उन्मुक्ता भवति।

(९)

अर्थ—(हे यक्ष !) जो तुम्हारी कृशांगी, नवयुवती, उन्नत दाँतों वाली (प्रिया) यक्षिणी थी वह अब टेलिविजन के पर्दे पर (युवकों को आकर्षित करने के लिए) चंचल नेत्रों वाली अभिनेत्री बनी दिखलाई देती है। तथा अनेक वस्तुओं के क्रय करने के लिए किये जा रहे विज्ञापन में अपने सुन्दर शरीर में साबुन की सुहावनी टिकिया को घिस-घिस कर नहाती हुई उन्मुक्त हो जाती है (अर्थात् निर्लज्जता-पूर्वक अपने शरीर का प्रदर्शन करती है।)

[१०]

बन्धो शेषं दुरितचरितं भारतस्य प्रवक्ष्ये,
धैर्यं धृत्वा श्रवणपुटकैः काव्यमेतत्पिबेस्त्वम् ।
लज्जामूका भवति विकला चेतना मानवीया,
सर्वानर्थं प्रकटयति हा दुष्टकालः कलिः किम् ॥

(१०)

अन्वय—बन्धो! भारतस्य शेषं, दुरितचरितम् (अपि) प्रवक्ष्ये त्वम्, धैर्यम्, धृत्वा, एतत् काव्यं, श्रवणपुटकैः पिबेः। (उच्यमानेऽस्मिन्) मानवीया, चेतना, लज्जामूका (सती) विकला, भवति, हा ! किं, दुष्टकालः, कलिः, सर्वानर्थम्, प्रकटयति ।

(१०)

अर्थ—हे मित्र ! भारतवर्ष की शेष बिगड़ी हुई दशा का भी मैं वर्णन करने जा रहा हूं। तुम धैर्य धारण कर अपनी श्रवणांजलि से इस काव्य को सुनो। (इसे सुनकर) मानवीय चेतना लज्जा से गूँगी वनी व्याकुल हो उठती है। क्या यह सब अनर्थ वह दुष्ट कलिकाल ही प्रकट कर रहा है। ?

[११]

तीर्थं जातं भृशमशुचि हा ! श्रीहरिद्वारसंज्ञं,
मध्येगङ्गं क्षिपति मलिनं यन्त्रशाला जलं तत् ।
रात्र्यावासोऽभवदीसुलभो होटलैर्दीर्घशुल्कै-
र्मद्यं मांसं प्रकटमभितो दृश्यते पण्यवीथ्याम् ॥

(११)

अन्वय—हा ! श्रीहरिद्वारसंज्ञं, तीर्थम् भृशम्, अशुचि, जातम्, तत्, मध्येगंगम्, मलिनं, यन्त्रशालाजलम्, क्षिपति । (तत्र) दीर्घशुल्कैः, होटलैः, रात्र्यावासः, असुलभः, अभवत् । पण्यवीथ्याम्, अभितः, मद्यं मांसम्, प्रकटम्, दृश्यते ।

(११)

अर्थः—दुःख है, हरिद्वार नामक शोभामय तीर्थ अब अत्यन्त अपवित्र हो गया है । वह मिलों और फैक्टरियों के मलिन जल को गंगा में निरन्तर गिराता रहता है । वहाँ महंगे किराये वाले होटलों के कारण रात्रि में ठहरना कठिन हो गया है तथा बाजारों में भी चारों ओर मद्य एवं मांस प्रकट में (बिकता) दिखलाई पड़ता है ।

[१२]

इन्द्रप्रस्थे परमसुखदं होटलं चाप्यशोकम्,
नेत्रातिथ्यं चिरमलभत श्रीविशालं विशालम् ।
स्वल्पीभूते कुचरितफले स्वर्गिणां सांसदानां,
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥

(१२)

अन्वय—इन्द्रप्रस्थे च श्रीविशालम्, परमसुखदं, विशालम् अशोकं होटलम्, चिरम्, नेत्रातिथ्यम् अलभत। स्वर्गिणां, सांसदानाम्, कुचरितफले, स्वल्पीभूते, शेषैः, पुण्यैः, हृतम् दिवः, कान्तिमत् एकम्, खण्डम्, इव (तद् अलक्ष्यत)।

(१२)

अर्थः—और (वहाँ से आगे चलकर) देहली में शोभाशाली सभी सुख सुविधाओं से युक्त विशाल (क्षेत्र में फैले) अशोक होटल को मेरे नेत्र देर तक देखते रहे। वह अशोक होटल मानो स्वर्ग की संसद् के सांसदों (देवों) के पापकर्मों के समाप्त होने पर शेष रहे पुण्यों से (पृथ्वी पर) लाया हुआ स्वर्ग का एक कान्तियुक्त भाग हो।

[१३]

इन्द्रप्रस्थे परमसुखदे, संसदो दीर्घकक्षे,
नेतारो मापलकनयनैः प्रेक्षमाणाः प्रसेदुः ।
स्थानात्तस्मात् कलहविपुलादुत्पपाताहमाशु,
नेतॄणां वै पथि परिहरन् स्थूलहस्तावलेपान् ।।

(१)

अन्वयः—इन्द्रप्रस्थे, परमसुखदे, संसदः, दीर्घकक्षे, नेतारः, मां, अपलकनयनैः, प्रेक्षमाणाः, प्रसेदुः । अहम्, कलहविपुलात्, तस्मात्, स्थानात्, पथि, नेतॄणां, स्थूलहस्तावलेपान्, परिहरन्, आशु, वै, उत्पपात ।

(१३)

अर्थः—इन्द्रप्रस्थ में अत्यन्त सुखद संसद् भवन की लम्बी दीर्घाओं में बैठे हुए नेता जन मुझे अपलक नयनों से देखते हुए बहुत प्रसन्न हुए । (किन्तु) मैं उस कलहपूर्ण स्थान से नेताओं के भारी हस्ताक्षेपों से अपने को बचाता हुआ मार्ग (की दिशा) में शीघ्रता से उड़ चला ।

[१४]

योऽसौ दृष्टो धवलवसनो यानमध्ये निविष्टः,
स्टेनोयुक्तश्चपलवचनो मन्त्रिनाम्ना प्रसिद्धः ।
सोऽयं नेताऽपहृतविभवो भूतपूर्वे चुनावे,
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा ॥

(१४)

अन्वयः—यानमध्ये, निविष्टः, धवलवसनः, स्टेनोयुक्तः, चपलवचनः, मन्त्रिनाम्ना प्रसिद्धः, योऽसौ दृष्टः, सोऽयं भूतपूर्वे चुनावे अपहृतविभवः नेता (अस्ति) कस्य, अत्यन्तं, सुखम्, उपनतम्, एकान्ततः, दुःखं वा (उपनतम्) ।

(१४)

अर्थः—(सुन्दर) मोटर कार में विराजमान, श्वेत खादी के वस्त्रों में लिपटे हुए, (महिला) स्टेनों के साथ चंचलतापूर्वक (हँस हँस कर) बात कर रहे मन्त्री नाम से पुकारे जाने वाले जो महाशय दिखलाई दिए थे, यह वही नेताजी थे जो पिछले चुनाव में अपनी जमानत भी हार बैठे थे। (पर आज का दृश्य उससे पूर्णतया भिन्न हैं। सत्य है), कौन है ऐसा जिसे एक मात्र सुख ही मिलता रहे या दुःख ही मिला करे।

[१५]

बन्धो ! देशे भरतसुभृते साम्प्रतं क्षुत्प्रवृद्धा,
रिक्तं चान्नैरुदरपिटकं दीनहीनप्रजायाः ।
सेतौ, बन्धे, भवनरचने, मोटरे, रेलयाने,
क्षुत्क्षामास्ते छलननिपुणा न्यासवित्तं हरन्ति ॥

(१५)

अन्वयः—बन्धो ! भरतसुभृते, देशे, साम्प्रतं, क्षुत्, प्रवृद्धा । दीन-हीनप्रजायाः च, उदरपिटकम्, अन्नैः, रिक्तम् (वर्तते) क्षुत्क्षामाः, ते सेतौ, बन्धे, भवनरचने, मोटरे, रेलयाने, छलननिपुणाः (सन्तः) न्यासवित्तं, हरन्ति ।

(१५)

अर्थ—मित्र ! कभी महाराज भरत द्वारा पालित इस भारत वर्ष में इस समय भूख वेग से वृद्धि को प्राप्त हो रही है । यहाँ की दीन हीन प्रजा का पेट अन्न के दानों से पूर्णतया रिक्त है । भूख से व्याकुल प्रजाजन (नदियों के) पुल, बाँध, भवन निर्माण, रोडवेज तथा रेलवे विभाग आदि में धोखाधड़ी करके धनराशि को हड़प रहे हैं ।

[१६]

बन्धो ! तेऽयं बहुप्रगतिकृद् भारतो देश आस्ते,
प्रारब्धं तद् रविदिवि महाभारतं चित्ररूपे ।
गहे गेहे मुखरमधुरः संजयो वाऽस्ति टी०वी०,
संवर्द्धन्ते विकृतचरितो देशजा धार्तराष्ट्राः ॥

(१६)

अन्वयः—बन्धो ! अयं, ते, भारतः, देशः, बहुप्रगतिकृद् आस्ते। अत्र तद्, महाभारतं, रविदिवि, चित्ररूपे, प्रारब्धम्, (अधुना) गेहे, गेहे, संजयो वा, मुखमधुरः, टी० वी० अस्ति, विकृतचरिताः, क्षुद्रकाः, धार्तराष्ट्राः (च) संवर्द्धन्ते ।

(१६)

अर्थः—बन्धुवर (पर) इस तुम्हारे देश भारतवर्ष ने (शिल्पविज्ञान में) बहुत उन्नति की है। यहाँ प्रति रविवार को वह प्रसिद्ध महाभारत दूरदर्शन के पर्दे पर दिखलाया जाने लगा है। अब घर घर में संजय की भाँति मधुर एवम् स्पष्ट वक्ता टी०वी० विद्यमान है, तथा धृतराष्ट्र के पुत्रों (कौरवों) की भाँति यहाँ के प्रजाजन विकृत चरित्र की दिशा में अत्यन्त उन्नतशील है।

[१७]

मार्गे कश्चिच्चपलरसिको यौवनोद्दामकामः,
दृष्ट्वा यान्तीं पथि विधुमुखीं सीत्कृतानि व्यतानीत् ।
पादत्राणैर्युवतिरपि सा प्राहरत्तं युवानम्,
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो न प्रियेषु ॥

(१७)

अन्वयः—मार्गे, यौवनोद्दामकामः, कश्चित्, चपलरसिकः, पथि, यान्तीं, विधुमुखीं, दृष्ट्वा सीत्कृतानि, व्यतानीत् । सा, युवतिः अपि, तं, युवानम्, पादत्राणैः, जघान । (सम्प्रति) प्रियेषु, विभ्रमः, स्त्रीणाम्, आद्यम् प्रणयवचनम् न (भवति) ।

(१७)

अर्थ—रास्ते में मैंने देखा कि यौवन के उद्दाम काम से अभिभूत किसी चंचल रसिक ने सड़क पर जा रही एक चन्द्रमुखी को देखकर जोर जोर से सीटियाँ बजाना प्रारम्भ कर दिया । इसके उत्तर में युवती ने भी उस युवक पर चप्पलों से प्रहार किया । (अब वह बात नहीं रही कि) स्त्रियों का सद्व्यवहार ही प्रेमी के प्रति प्रथम प्रेम वचन है ।

[१८]

पत्न्या हीना य इह मनुजाः स्वैरिणस्त्यक्तमार्गाः,
सक्रीडं ते विविधविधिना मोदमानाश्चरन्ति ।
पत्न्या युक्ता मुषितविभवा बालवृन्दैः परीताः,
रज्वा प्रोता नसि नतमुखा जीवनं हा नयन्ति ।।

(१८)

अन्वयः—हा ! ये, मनुजाः, पत्न्या, हीनाः, स्वैरिणः, त्यक्तमार्गाः (च सन्ति) ते, विविधविधिना, मोदमानाः, सक्रीडं चरन्ति । (अथ ये) पत्न्या युक्ताः (सन्ति) ते मुषितविभवाः, बालवृन्दैः, परीताः नसि, रज्वा, प्रोताः (इव) नतमुखाः (सन्तः) जीवनं, नयन्ति ।

(१८)

अर्थ—इस संसार में जो मनुष्य पत्नी से रहित, स्वेच्छाचारी तथा शास्त्रीय मार्ग के त्यागी हैं, वे अनेक प्रकार से आनन्दित होते हुए जीवन बिता रहे हैं तथा जो पत्नी से युक्त (गृहस्थ जन) हैं, वे धनहीन हैं और अनेक बालकों से युक्त हैं। नाक में नकेल पड़े हुए (पशु के समान ग्लानि से) नीचे को मुख किए हुए जैसे तैसे जीवन को ढो रहे हैं।

[१९[

मासादौ यन्मुदितमनसो वेतनं प्राप्नुवन्ति,
पत्नीहस्ते ददति पतयस्तद्ध्यकिंचिद् ब्रुवाणाः ।
पत्न्यस्तेषु प्रणयरहिता नैव काले सहायाः,
आमासार्द्धादनुनयपरास्ते हि ताः प्रीणयन्ति ॥

(१९)

अन्वयः—पतयः, मासादौ, मुदितमनसः (सन्तः) यद्, वेतनं प्राप्नुवन्ति तद् हि अकिञ्चिद् ब्रुवाणाः (सन्तः) पत्नीहस्ते, ददति। (परम्) पत्न्यः, तेषु प्रणयरहिताः (सत्यः) काले सहायाः न भवन्ति हि, ते आमासार्द्धात्, अनुनयपराः (सन्तः) ताः प्रीणयन्ति ।

(१९)

अर्थ—पति जन महीने के प्रारम्भ में प्रसन्न मन से जो वेतन प्राप्त करते हैं, वह सब विना कुछ कहे अपनी पत्नियों के हाथ में दे देते हैं, परन्तु इतने पर भी उनकी पत्नियाँ उनसे प्रेम न कर उनकी समय पर सहायता नहीं करतीं, अतः उनके पति आधा महीना बीतते बीतते अनुनय विनय पूर्वक उन्हें मनाने में लग जाते हैं।

[२०]

दीना हीना मलिनवदनाः सप्रयासं हसन्तः,
प्रातः सायं कटुकवचनान्यंगनानां पिबन्तः ।
हस्तौ बद्ध्वा विनयवचनैः रूप्यकं याचमानाः,
पीड्यन्ते हा प्रतिदिनमिमे कामिनीभिः स्वकान्ताः ॥

(२०)

अन्वयः—हा ! प्रतिदिनं, कामिनीभिः, दीनाः हीनाः, मलिन-वसनाः, सप्रयासं, हसन्तः, प्रातः सायम्, अंगनानाम्, कटुकवचनानि, पिबन्तः, हस्तौ, बद्ध्वा, विनयवचननैः रूप्यकं, याचनमानाः इमे, स्वकान्ताः, पीड्यन्ते ।

(२०)

अर्थ—दुःख है, स्त्रियों के द्वारा, प्रतिदिन दीन, हीन, (न धुलने के कारण) मैले कपड़े पहिने हुए, दुःखी होने पर भी सामाजिक शिष्टाचार के कारण प्रयत्न पूर्वक हँसते हुए, प्रातः और सन्ध्या के समय उनके कटुवचन सह कर भी हाथ जोड़ अनुनय-विनय पूर्वक रुपए की याचना कर रहे अपने पतियों को पीड़ा पहुँचायी जाती है ।

[२१]

गर्भाधानक्षणपरिचये भारतीया रमण्यः,
शीघ्रं गत्वा जठरभरदं शैशवं घातयन्ति ।
ग्रामे ग्रामे स्थितिमुपगता सार्वकारी व्यवस्था,
यस्याः हेतोः सरलमभवद्गर्भनाशस्य कृत्यम् ॥

(२१)

अन्वयः—भारतीयाः, रमण्यः, गर्भाधानक्षणपरिचये, गत्वा, शीघ्र जठरभरदं शैशवं घातयन्ति । (अथवा) गर्भाधानक्षणपरिचये शीघ्रं (औषधालयम्) गत्वा जठरभरदं शैशवं घातयन्ति । ग्रामे, ग्रामे (किं पुनः नगरेः) सार्वकारी, व्यवस्था, स्थितिम्, उपगता, यस्याः हेतोः गर्भनाशस्य, कृत्यम् सरलम्, अभवत् ।

(२१)

अर्थ—अब भारत की स्त्रियों को जैसे ही अपनी गर्भ स्थिति का बोध होता है वे तुरन्त ही उसे नष्ट करा देती हैं । (अथवा) गर्भ-स्थिति का बोध होते ही अस्पताल जाकर वे उसे हटवा देतीं हैं । नगर की तो बात ही क्या अब तो गाँव गाँव में इसके लिए सरकार की ओर से पक्की व्यवस्था कर दी गयी है । इससे अब गर्भ विनाश का (गर्हित) कृत्य सरल हो गया है ।

[२२]

गेहे गेहे नगरविपणौ व्याकुला नो युवानो,
येषां हस्तेष्वलघुभरवन्त्यंकपत्राणि सन्ति ।
नित्यं प्राप्तुं किमपि धनदां कांचिदाजीविकां ते,
कार्यागारादुषसि निकटे पंक्तिबद्धा भवन्ति ।।

(२२)

अन्वयः—गेहे, गेहे, नगरविपणो, नः व्याकुलाः ते, युवानः--येषां, हस्तेषु, अलघुभरवन्ति, अंकपत्राणि, सन्ति, नित्यम् किमपि धनदाम्, काञ्चिद्, आजीविकां, प्राप्तुम्, उषसि, कार्यागारात् निकटे, पंक्तिबद्धाः भवन्ति ।

(२२)

अर्थ—घर घर और नगर के बाजारों में घबड़ाये हुए हमारे देश के युवक अपने हाथों में 'उत्तीर्ण की हुई परीक्षाओं के' भारी भरकम प्रमाण-पत्रों, अंक-पत्रों आदि का गट्ठर थामे हुए यत् किंचित् दे सकने वाली किसी छोटी सी नौकरी को पाने के लिए सवेरे से ही कार्यालयों के निकट लाइन लगा कर खड़े हो जाते हैं ।

[२३]

खादीवस्त्रं करविरचितं धारयित्वातिधूर्ताः,
स्वल्पे ग्रामे महति नगरे चापि स्वैरं चरन्ति ।
मन्ये नूनं गुणपरिकरः शिक्षितस्तैर्बकेभ्यः,
श्वेतिम्ना ते स्वगुरुसदृशं वस्तुमीनं ग्रसन्ते ॥

(२३)

अन्वयः—अतिधूर्ताः, करविरचितं, खादीवस्त्रं धारयित्वा, स्वल्पे, ग्रामे, अपि च, महति नगरे स्वैरं, चरन्ति । मन्ये, तैः, नूनम् बकेभ्यः, गुणपरिकरः, शिक्षितः (येन) ते श्वेतिम्ना, वस्तुमीनम् स्वगुरुसदृशम्, ग्रसन्ते ।

(२३)

अर्थ—(वर्तमान में) पक्के धूर्त (कुछ व्यक्ति) हस्त निर्मित खादी वस्त्रों को धारण कर (प्रजाजन के हित करने का अभिनय करते हुए) (क्या) छोटे छोटे गाँवों में और (क्या) बड़े बड़े नगरों में (सर्वत्र ही) स्वतंत्रता पूर्वक विचरण कर रहे हैं। मुझे ऐसा प्रतीत होता है कि निश्चय ही उन्होंने (अपनी) इन चालों को बगुलों से सीखा है तभी तो वे इस सफेदी के प्रदर्शन से वस्तुरूपी मछलियों को अपने गुरु (बगुलों) के समान गटक रहे हैं।

[२४]

उच्चैर्मूल्यैर्जनपदगताः सज्जना निश्वसन्तः,
आम्रांस्त्यक्त्वा सहजसुलभानलुकान् भक्षयन्ति ।
सायं प्रातः परिजनयुताः शर्करा - तण्डुलादि-
प्राप्त्यर्थं ते श्रमितचरणैः पंक्तिबद्धा भवन्ति ।।

(२४)

अन्वयः—जनपदगताः सज्जनाः, उच्चैः, मूल्यैः (उच्चैः) निश्वसन्तः (उच्चैः मूल्यैः लभ्यान्) आम्रान्, त्यक्त्वा, सहजसुलभान् आलुकान्, भक्षयन्ति । (अथ च) ते, परिजनयुताः शर्करातण्डुलादिप्राप्त्यर्थम् सायम् (पुनः) प्रातः, श्रमितचरणैः पंक्तिबद्धाः, भवन्ति ।

(२४)

अर्थ—इस देश के भद्र नागरिक वस्तुओं के मूल्य चढ़ जाने के कारण लम्बी आहें भरते हुए महँगे आमों को छोड़कर आसानी से और सस्ते मिलने वाले आलुओं को खा कर जीवन निर्वाह कर रहे हैं। वे बेचारे अपने परिवारजनों को साथ ले चीनी चावल आदि पाने के लिए थके पाँवों से सन्ध्या को और पुनः सवेरे (राशन की दुकान के सामने) कतार लगाकर खड़े हो जाते हैं।

[२५]

सत्त्वं नष्टं सकलगुणिनां निर्बलास्ते त्रपन्ते,
दुष्टाः सर्वे मुदितमनसः कार्यसिद्धिं लभन्ते ।
साधूंस्त्यक्त्वा दुरितचरितानाश्रयन्ते हि लोकाः,
याच्ञा मोघा भवति सुजने नाधमे सा कदाचित् ।।

(२५)

अन्वयः—सकलगुणिनां, सत्त्वम् नष्टम्, निर्बलाः (सन्तः) ते, त्रपन्ते । सर्वे, दुष्टाः (च) मुदितमनसः (सन्तः) कार्यसिद्धिम् लभन्ते । लोकाः, साधून्, त्यक्त्वा, दुरितचरितान्, आश्रयन्ते, हि सुजने याच्ञा मोघा, भवति, सा, अधमे, कदाचित्, न (भवति)

(२५)

अर्थः—समस्त गुणशालियों की शक्ति क्षीण हो गयी है; अतः वे अपनी शक्तिहीनता के कारण लज्जित रहते हैं जबकि दुष्टजन प्रसन्न रहते हुए अपने कार्यों में सफलता प्राप्त करते हैं। सांसारिक जन सज्जनों का त्याग कर दोषी चरित्र के लोगों का आश्रय लेते हैं। (इस कलियुग में तो कुछ ऐसा है कि) सज्जन पुरुष से की गयी याचना व्यर्थ हो जाती हैं पर यदि अधम पुरुष से वह की जाये तो व्यर्थ नहीं होती ।

[२६]

मन्त्रिश्रेष्ठो विषयकुशलः सर्वकाराधिकारी,
क्लिष्टं कार्यं दधिघृतमुखैर्वस्तुभिर्नो करोति ।
तस्मै रम्या कुशलगणिका दूरभाषेण देया,
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥

(२६)

अन्वयः—मन्त्रि श्रेष्ठः, विषयकुशलः, सर्वकाराधिकारी (सन्नपि) दधिघृतमुखैः, वस्तुभिः, क्लिष्टं कार्यं नो, करोति । तस्मै, रम्या, कुशलगणिका दूरभाषेण, देया (भवति) कः, ज्ञातास्वादः, (सन्) विवृतजघनां विहातु', समर्थः (वर्तते) ।

(२६)

अर्थः—अपने में कुछ कुशल एवं सरकारी अधिकारी होते हुए भी मन्त्रिवर एवं सरकारी अधिकारी दही, घी, आदि (वस्तुओं का उपहार) लेकर भी कठिन कार्य नहीं करते । उनके लिए सुन्दर एवं कुशल वेश्या (काल गर्ल) की व्यवस्था करना आवश्यक है। (महाकवि कालिदास ने उचित ही कहा है कि) जिसने एक बार स्त्री की खुली जंघाये देख लीं (अर्थात् सम्भोग सुख प्राप्त कर लिया) वह उसे नहीं छोड़ सकता ।

[२७]

विद्यागेहे श्रमिकभवने सर्वकारालयेऽपि,
यन्त्रागारे किमधिकमहो सर्वदिक्ष्वेव नित्यम् ।
रम्या हृद्याः सरसमधुरा भारतीया रमण्यो
हा शोष्यन्ते दितिजचरितैः कान्तिमत्यो वराक्यः ॥

(२७)

अन्वयः—अहो ! विद्यागेहे, श्रमिकभवने, सर्वकारालयेऽपि, यन्त्रागारे, किमधिकम, सर्वदिक्षु एव, हा, नित्यम्, दितिजचरितैः रम्याः, हृद्याः, सरसमधुराः, कान्तिमत्यः, वराक्यः, भारतीयाः, रमण्यः, शोष्यन्ते ।

(२७)

अर्थः—विद्यालयों, कारखानों, सरकारी कार्यालयों, फैक्टरियों और मिलों में यहाँ तक कि सभी विभागों में हा ! राक्षसी वृत्ति के (अधिकारी) पुरुषों के द्वारा नित्य हीं सुन्दर, मनोहर, सरस, मधुर (वार्तालाप करने वाली) कान्तिपूर्ण बेचारी भारतीय (कर्मचारी) महिलाओं का शोषण किया जाता है ।

[२८]

रम्या बाला नवलकलिका कोमालांगी कुरंगी,
पित्रोरंके सपदि मुदिता लीयते पालिता या।
हस्तं याता कथमपि सखे कामवेगातुराणाम्,
तैश्च क्रूरैरधमधनपै राक्षसैर्हा हता सा ॥

(२८)

अन्वयः—सखे ! रम्या, नवलकलिका कोमलांगी, कुरंगी, सपदि, या बाला, पालिता पित्रोः अंके मुदिता (सती) सपदि लीयते (स्म) सा, कथमपि, कामवेगातुराणां, हस्तं याता। हा ! तैः क्रूरैः, अधम-धनपैः राक्षसैः च (सा) हता।

(२८)

अर्थः—मित्र ! नवीन (पुष्प) कलिका की भाँति कोमल अंगों वाली, हिरनी सी (भोली), (शैशव में) माता-पिता की गोद में दुबक जाने वाली जिस सुन्दर कन्या का उसके माता-पिता ने प्रेम से पालन किया था, दुःख है वह किसी प्रकार कामी पुरुषों के हाथों में पड़ गयी तब उन क्रूर एवम् धन लोभी (दहेज) राक्षसों ने उसकी हत्या कर दी।

[२९]

रज्ज्वा बद्ध्वा स्वगलमथवा रेलमार्गे पतित्वा,
काश्चिद् बाला गरलगुटिकां भक्षयित्वा म्रियन्ते ।
अग्नौ दग्ध्वा मृदुलवपुषं सागरे वा सरित्सु,
ता मज्जित्वा सकलजनतापापमुन्मज्जयन्ति ॥

(२९)

अन्वयः—काश्चिद्, बालाः, स्वगलम्, रज्ज्वा, बद्ध्वा, अथवा रेलमध्ये पतित्वा (अथवा) गरलगुटिकां भक्षयित्वा म्रियन्ते । (एवम्) ताः, मृदुलवपुषं, अग्नौ दग्ध्वा, सागरे सरित्सु वा मज्जित्वा, सकल जनतापापम्, उन्मज्जयन्ति ।

(२९)

अर्थः—(कामी पुरुषों के द्वारा बलात् भ्रष्ट की गयी) कुछ लड़कियाँ गले में रस्सी का फन्दा लगाकर अथवा रेलवे लाइन की पटरियों पर लेटकर या विषैली (नींद की) गोलियाँ खाकर आत्म-हत्या कर लेती हैं । कभी वे अपने कोमल शरीर को जला डालती हैं या समुद्र या नदियों में डूब मरती हैं । इस प्रकार वे स्वयं डूबकर लोगों के पापों को प्रकट कर देती हैं ।

(३०)

दृष्ट्वा तासां करुणमृतिदां तां दशां हा व्यषीदम्,
मन्दं मन्दं जलकणमिषात्स्वाश्रुविन्दूनमुञ्चम् ।
रुद्धत्कण्ठः सजलनयनो दुःखदग्धो ह्यगर्जम्,
इच्छा जाता सकलभुवनं वज्रघातेन हन्याम् ॥

(३०)

अन्वयः—हा ! तासां, करुणमृतिदां, तां, दशां, दृष्ट्वा व्यषीदम्, जलकणमिषात् (च) स्वाश्रुविन्दून्, मन्दं, मन्दम्, अमुञ्चम्, दुःखदग्धः रुद्धत्कण्ठः, सजलनयनः, हि, सकलभुवनं बज्रघातेन हन्याम् (इति मे) इच्छा जाता।

(३०)

अर्थः—हाय, करुण मृत्यु (के लिए विवश कर) देने वाली उन लड़कियों की (दयनीय) दशा को देखकर मैं बहुत व्यथित हुआ, जल-कणों के बहाने मैंने (अपनी आँखों से) अश्रुबिन्दुओं को गिराया। मेरा कण्ठ अवरुद्ध हो रहा था, आँखों में आँसू तैर रहे थे। दुःख से जला हुआ मैं जोर से गरजने लगा। (क्रोध के कारण) इच्छा हो रही थी कि मैं बज्र गिराकर सारे संसार को नष्ट कर दूँ।

[३१]

भ्रष्टाचारस्त्वशुभचरणं न्यस्तवान्देशमध्ये,
शिष्टाचारे स परिणमतेऽहर्निशं तीव्रगत्या ।
सायंकाले मलिनमलिने सूर्यबिम्बे यथा द्राक्,
घोराकाराः प्रतिदिशिमहो ह्यन्धकाराः पतन्ति ।।

(३१)

अन्वयः—भ्रष्टाचारः, देशमध्ये, अशुभचरणं, न्यस्तवान्, अहो ! स तु (च) अहर्निशं, तीव्रगत्या, शिष्टाचारे, परिणमते । यथा सायंकाले, सूर्यबिम्बे, मलिनमलिने (सति) प्रतिदिशम् घोराकाराः, अन्धकाराः द्राक् पतन्ति हि ।

(३१)

अर्थः—भ्रष्टाचार ने (भारत) देश के मध्य में (अपना) अशुभ चरण (दृढ़ता पूर्वक) जमा लिया है, परन्तु आश्चर्य हैं कि वह (भ्रष्टाचार) दिन रात तीव्रगति से शिष्टाचार में परिणत होता जा रहा है, जैसे संध्या के समय सूर्य मण्डल के धुँधले पड़ते ही चारों ओर से तेजी से भयंकर अंधकार घिरने लगता है ।

[३२]

गव्यं सर्पिर्मधु दधि पयः स्वर्गलोके गतानि,
तन्मिष्टान्नं मधुरसरसं भक्ष्यते स्वप्न एव ।
वारं वारं कुपितवनिता वाक्यशल्यं क्षिपन्ति,
यन्त्रे सिद्धा डबलवटिका स्वामिनां भक्ष्यमेकम् ।।

(३२)

अन्वयः—गव्यं, सर्पिः, मधु, दधि, पयः, स्वर्गलोके गतानि (अधुना) तत् मधुरसरसं मिष्टान्नं, स्वप्ने, एव भक्ष्यते । कुपितवनिताः वारं वारं वाक्यशल्यं क्षिपन्ति (अतः) स्वामिनां, यन्त्रे सिद्धा डबलवटिका एकम्, भक्ष्यम् (अवशिष्टम्) ।

(३२)

अर्थः—गाय का मीठा दूध, दही एवं घी ये सब पदार्थ स्वर्गलोक चले गये हैं अर्थात् पूर्णतया दुर्लभ हो गये हैं तथा वह (पूर्वलोक में प्राप्य) रसमय मधुर मिष्टान अब स्वप्न में ही भले खाया जाता हो (प्रकट में तो वह नहीं दिखलाई देता) क्रोध से तमतमाती हुई स्त्रियाँ अपने पतियों पर वचन रूपी भाले चला रही हैं । (इस स्थिति में) उनके स्वामियों की एक मात्र भक्ष्य वस्तु बेकरी में बनी डबल रोटी (ही बच) रही है ।

[३३]

कृष्णं द्रव्यं प्रचुरमनिशं वस्तु वैदेशिकं च,
संचिन्वाना दनुजवणिजो देशमध्ये रमन्ते ।
भोग्यं तेषां रमणकुशलाश्चापि बाला भवन्ति,
लोभार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥

(३३)

अन्वयः—दनुजवणिजः, अनिशं, कृष्णं, द्रव्यं, वैदेशिकं, वस्तु च सञ्चिन्वानाः, देशमध्ये, रमन्ते । तेषां, च, भोग्यं रमणकुशलाः बालाः, अपि, भवन्ति । हि, लोभार्ताः, चेतनाचेतनेषु, प्रकृतिकृपणाः (भवन्ति) ।

(३३)

अर्थः—राक्षसवृत्ति के व्यापारी निरन्तर काले धन तथा विदेशी वस्तुओं का संग्रह करते हुए देश में आमोद प्रमोद में निरत रहते हैं। उनके भोग्य पदार्थ रतिकुशल युवतियाँ भी हुआ करती हैं। सत्य है, लोभ के वशीभूत पुरुष क्या जड़, क्या चेतन सभी के प्रति स्वभाव से ही दीन (याचक) होते हैं।

[३४]

चौरा जाता नगरधनिकास्तस्करा नेतृभूता,
वेश्या यास्ता दलितदयिताः शिक्षकास्तेऽपि मूढाः ।
सन्तः सर्वे विलयमधुना हा प्रयाताः कुतश्चिद्,
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥

(३४)

अन्वयः—चौराः, नगरधनिकाः, जाताः, याः, वेश्याः, ताः दलितदयिताः (ये) शिक्षकाः, ते, अपि (च) मूढाः (सन्ति) हा ! अधुना सर्व, सन्तः, कुतश्चिद्, विलयं, प्रयाताः, दशा, चक्रनेमिक्रमेण, नीचैः उपरि, च गच्छति ।

(३४)

अर्थः—जो पहले चोर थे अब वे नगर सेठ हो गये हैं। जो वेश्याएँ हैं वे (अब) अपने प्रेमियों को पीड़ा पहुँचा रही हैं। जो शिक्षक हैं वे स्वयं अज्ञानी हैं। दुःख की बात है कि इस युग में सभी सत्पुरुष न जाने कहाँ खो गये है। सच है, (काल की), स्थिति पहिये की धुरी की भाँति कभी ऊपर तो कभी नीचे होती रहती है।

[३५]

यस्मिन्देशे परमसुखदे पञ्चवारां पवित्रे,
ऋद्ध्या सिद्ध्या प्रचुरविभवैर्योजनाः प्रागनन्दन् ।
बाला वृद्धा युवतियुवका हृष्टपुष्टा बलाढ्याः,
हन्यन्ते ते प्रतिदिनमहो तत्र हातंकवादैः ॥

(३५)

अन्वयः—अहो ! पञ्चवारां, पबित्रे, परमसुखदे, यस्मिन् देशे, प्राक् ये जनाः ऋद्ध्या, सिद्ध्या, प्रचुरविभवैः (च) अनन्दन् हा ! तत्र ते हृष्टपुष्टाः बलाढ्याः, युवतियुवकाः, प्रतिदिनम्, आतंकवादैः हन्यन्ते ।

(३५)

अर्थः—अहो ! पाँच (नदियों के) जलों से पबित्र (अपनी शस्य सम्पदा के कारण) अत्यन्त सुखदायी जिस (पंजाब) देश (राज्य) में पहिले जो लोग ऋद्धि, सिद्धि एवं विविध सम्पदाओं से (युक्त होकर) आनन्दित रहा करते थे, दुःख है अब वहीं वे हृष्ट, पुष्ट एवम् बलवान् युवक युवतियाँ आतंकवादियों के द्वारा (निर्दयतापूर्वक) मारे) जा रहे हैं ।

[३६]

येऽपुः पूर्वं ह्यमृतसरसः पुण्यपीयूषवारि
क्रोधान्धास्ते गरलमधुना हिंसका उद्गिरन्ति ।
तत्रातंकं विकटघटितं हेमदेवालयेऽपि,
नित्यं नूत्नं विविधभयदं दिक्षु विस्तारयन्ति ॥

(३६)

अन्वयः—पूर्वम्, ये हि अमृतसरसः, पुण्यपीयूषवारि, अपुः अधुना ते क्रोधान्धाः, हिंसकाः (च सन्तः) गरलम् उद्गिरन्ति । तत्र हेमदेवालयेऽपि, विकटघटितम्, आतंकम्, नित्यम् नूतनम्, विविधभयदम् दिक्षु, विस्तारयन्ति ।

(३६)

अर्थः—पहले जो अमृतसर में (श्रद्धापूर्वक लेकर) अमृत के समान पवित्र जल पिया करते थे वे ही (कुछ राह भटके) लोग हिंसा में लिप्त हैं और क्रोध में अन्धे हो (अपना विवेक खोकर) विष उगल रहे हैं। वहाँ के स्वर्ण मन्दिर में ही विकट (कूटनीतिमय) आतंकवाद (का षड्यन्त्र) रचा गया है, उसे वे लोग नित्य नवीन और विविध जनों को समान रूप से भयकारी बनाते हुए दिशाओं में फैला रहे हैं।

[३७]

उक्तं यत्ते प्रथमसुकृतैः सज्जना आद्रियन्ते,
सन्तो भ्रातर्विलयमधुना ते प्रयाताः कुतश्चित् ।
रात्रौ कश्चिद् विशति शरणापेक्षया मित्रगेहे,
तं मन्यन्ते क्षुभितहृदया आगतं शत्रुमेव ॥

(३७)

अन्वयः— भ्रातः ! सज्जनाः प्रथमसुकृतैः (सुकृतिनः) आद्रियन्ते । इति यत् ते प्रथमम् उक्तम्, ते, सन्तः, अधुना कुतश्चित् विलयम्, प्रयाताः । (अधुना यदि) शरणापेक्षया कश्चित् रात्रौ मित्रगेहे विशति (तदा) क्षुभितहृदयाः तम् आगतं, शत्रुमेव, मन्यन्ते ।

(३७)

अर्थः—हे भाई, (कभी) तुमने पहिले कहा था कि सज्जन (अपने साथ) किये गये पहिले उपकारों को ध्यान में रखकर (उपकारी का) आदर सम्मान (एवम् आतिथ्य) किया करते हैं, पर अब वे ऐसे सज्जन (न जाने) कहाँ लुप्त हो गये हैं। अब तो यदि टिकने की आशा से रात्रि में कोई व्यक्ति (अपने) मित्र के घर में प्रवेश करता है तो वे लोग उसे ऐसा मानते हैं कि यह 'हमारा' शत्रु ही आया है।

[३८]

सुन्दर्यस्ताः पथि न मिलिता उद्गृहीतालकान्ताः,
केशास्तासामगुरुरहिता नापितैः कृत्तपूर्वाः ।
शैम्पूद्रव्यैः सुरभिमसृणा ब्यूटिकावीथिकासु,
दृष्टा बन्धो चकितचकितं ते मया भिन्नबन्धाः ।।

(३८)

अन्वयः—बन्धो ! पथि, उद्गृहीतालकान्ताः, ताः, सुन्दर्यः, न मिलिताः, तासाम् केशाः नापितैः कृत्तपूर्वाः अगुरुरहिताः (च आसन्) ब्यूटिकावीथिकासु, शैम्पूद्रव्यैः, सुरभिमसृणाः भिन्नबन्धाः (च) ते, मया, चकितचकितम्, दृष्टाः ।

(३८)

अर्थः—हे भाई, (मुझ मेघ को देखने के लिए) अपने घुँघराले बालों को ऊपर की ओर किये हुए वे (तुम्हारे द्वारा बतलाई गई पहिले जैसी) सुन्दरियाँ मार्ग में नहीं मिलीं। अब (उनके) वे केश (कई शैली में) नाइयों द्वारा छोटे कर दिये गये हैं, अगुरु की गन्ध से सुवासित भी नहीं है बल्कि ब्यूटी पार्लरों में शैम्पू प्रसाधनों द्वारा उन्हें सुगन्धित तथा चमकीला किया गया है, (वेणी के स्थान पर) पूर्णतया खुले (हुए लहरा रहे) हैं। मैं उन्हें (इस परिवर्तन के कारण) आश्चर्य चकित हो देर तक देखता रहा।

[३९]

मुञ्चन्ते हा सुभग ! सुरभि वर्षणाद् ये दिगन्ते,
केदारास्ते विविधमलिनैरूर्वरैर्नष्टगन्धाः ।
अन्नं सर्वं विरसमभवद् रोगसंवर्द्धकञ्च,
तत्किं वच्मि प्रकटमधुना षड्रसास्तेऽपि नष्टाः ॥

(३९)

अन्वयः—सुभग ! ये, वर्षणाद्, दिगन्ते सुरभि, मुञ्चन्ते हा ! ते केदाराः अधुना विविधमलिनैः, ऊर्वरैः, नष्टगन्धाः (सन्ति) सर्वम्, अन्नम्, विरसम्, रोगसंवर्द्धकम् च अभवत् । तत्, किं प्रकटम्, वच्मि, ते षड् रसा अपि नष्टाः ।

(३९)

अर्थः—हे नेत्रानन्दकारी (मित्र) ! वर्षा होने के कारण जो कभी दिशाओं में सुगन्ध विखेरा करते थे अब वे खेत अनेक प्रकार के मलिन उर्वरकों द्वारा अपनी सुगन्ध खो चुके हैं। सभी प्रकार का अन्न भी स्वादरहित एवं रोगवृद्धिकारक हो गया है। क्या-क्या साफ-साफ कहूँ अहा वे (मधुर, अम्ल आदि) छह रस (जो खाद्य वस्तुओं में हुआ करते थे) अब नष्ट हो चुके हैं।

[४०]

आसारे मे प्रचुरजलदे हर्षदे शान्ततापे,
क्रीडासक्ता विवृततनवः स्नानमग्ना न बालाः ।
नष्टा तेषां श्रमविरचिता कार्गली नौर्मनोज्ञा,
मल्हाराणि व्यपगतशुचान्यत्र मौनं भजन्ति ॥

(४०)

अन्वयः—प्रचुरजलदे, शान्ततापे, हर्षदे, मे, आसारे विवृततनवः, स्नानमग्नाः, क्रीडासक्ताः, बालाः, न, दृष्टाः । तेषां श्रमविरचिता, मनोज्ञा, कार्गली नौः, (अपि) नष्टा । व्यपगतशुचानि, मल्हाराणि, अपि अत्र, मौनं, भजन्ति ।

(४०)

अर्थः—(चारों ओर लवालव) पानी (भर) देने वाली, तपन को दूर भगा देने वाली तथा आह्लाद प्रदान करने वाली मेरी वर्षा (की तेज झड़ी) में नंग धड़ंग हो नहा रहे तथा खूब खेल रहे बालक (नई सभ्यता के प्रचलन से) अब कहीं देखने को नहीं मिले । परिश्रम से बनाई गई उनकी सुहावनी कागज की नाव भी अब नष्ट हो गई है । तथा यहाँ (कहीं भी) उदासी को दूर भगा देने वाले मल्हार गीत भी (नहीं सुनाई पड़ते, मानो वे) पूर्णतया मौन भाव को प्राप्त हैं ।

[४१]

भोपालाख्ये महति नगरे चारुहर्म्ये प्रसिद्धे
गत्वा पूर्वं सुखदरचनां तस्य दृष्ट्वा प्रसन्नः ।
पश्चाद्भीतो विपुलजनताप्राणहर्तुः कुकालाद्,
येनानीतः प्रलयपवनो गैसकाण्डो ह्यकाण्डे ।।

(४१)

अन्वयः—चारुहर्म्ये, प्रसिद्धे, भोपालाख्ये, महति, नगरे, गत्वा पूर्वम् 'अहम्) तस्य, सुखदरचनां, दृष्ट्वा प्रसन्नः (अभवम्) पश्चात् विपुलजनताप्राणहर्तुः (तस्मात्) कुकालाद्, भीतः (अभवम्) येन अकाण्डे गैसकाण्डः, प्रलयपवनः, आनीतः, हि ।

(४१)

अर्थः—सुन्दर भवनों से सम्पन्न, प्रसिद्ध भोपाल नामक विशाल नगर में पहुँचकर पहिले तो मैं वहाँ की सुखद (एवं सुनियोजित) नगर रचना को देखकर प्रसन्न हुआ किन्तु उसके थोड़े ही अन्तर से बहुत से मनुष्यों के प्राणों का (एक साथ) हरण लेने वाले उस दुष्ट काल से भयभीत हो उठा जिसने असमय में ही गैसकाण्ड रूपी प्रलय कालीन वायु को ला (उपस्थित) किया था ।

[४२]

तस्माद्देशात्त्वरितचरणैस्तेन यातोऽधुनापि,
दीनाः लोका मरणविकला नेत्रमध्ये तरन्ति ।
नेतारो हा ! मृतजनकृते दत्तवित्तं हरन्ति,
दीनाश्चेत्थं पुनरपि मृता न्यायगेहं श्रयन्ते ।।

(४२)

अन्वयः—तेन (अहम्) तस्माद्, देशात्, त्वरितचरणैः यातः (अस्मि) अधुनाऽपि, (तत्रत्याः) मरणविकलाः, दीनाः, लोकाः (मम) नेत्रमध्ये तरन्ति । हा ! (एवं सत्यपि) नेतारः, मृतजनकृते दत्तवितं, हरन्ति, इत्थम् च पुनरपि मताः (इव ते) दीनाः न्यायगेहं श्रयन्ते ।

(४२)

अर्थः—इसलिए मैं उस स्थान (भोपाल नगर) से शीघ्रता से पग बढ़ाते हुए चल दिया । अब भी मृत्यु से छटपटाते हुए (वहाँ के) दुःखी जन मेरी आँखों में तैर रहे हैं । उस पर भी दुःख की बात यह और है कि मृत्यु के कारण (मृतक के परिवार जनों को शासन द्वारा सहायतार्थ) दिये गये धन को (स्थानीय) नेता हड़प रहे हैं, अतः वे दुःखी जन (इस नवागत संकट से) पुनः मरे हुए से (अतिशय पीड़ित) होकर न्यायालय की शरण ले रहे हैं ।

[४३]

दीर्घैर्घोषैः श्रवणसुभगैरुच्छिलीन्ध्रा जनेषु,
छत्राका अप्यशुचिभरिता मूल्यमुच्चैर्दधानाः ।
विक्रीयन्ते ह्यधिकद्विशतै रूप्यकैः प्रस्थमात्रम्,
पुष्णन्त्येते रतिकुशलतां कच्चिदेतच्छ्रुतं ते ॥

(४३)

अन्वयः—अशुचिभरिताः (अपि) उच्चैः, मूल्यम्, दधानाः, उच्छिलीन्ध्राः, छत्राकाः, जनेषु, श्रवणसुभगैः, दीर्घैः घोषैः, अधिकद्विशतैः रूप्यकैः प्रस्थमात्रं, विक्रीयन्ते। एते, रतिकुशलतां, पुष्णन्ति एतत्, ते, श्रुतं, कच्चित् ।

(४३)

अर्थः—अपवित्रता से परिपूर्ण होने पर भी ऊँचे मूल्यों पर बिकने वाले शिलीन्ध्र के छत्ते (कुकुरमुत्ते) कर्णप्रिय उच्च स्वरों में (सब्जी विक्रेताओं के द्वारा) बेचे जाते हैं। ये (इतने महँगे होते हैं कि) दो सौ रुपए से भी अधिक रुपयों में १किलोग्राम के भाव से बिकते हैं। क्या तुमने सुना है कि ये रति शक्ति की वृद्धि करते हैं (इनके महँगे होने का एक कारण यह भी है, वैसे ये अत्यन्त स्वादिष्ट भी होते हैं।)

[४४]

द्वित्रा दृष्टा वृषभसहिताः कर्षकाः सीरलग्नाः,
प्रायोऽभूवन् कृषिविरचने यन्त्रगोदारणानि ।
दोलागीतं सरसमधुरं श्रूयते नो कुहाऽपि,
श्रूयेतेदं यदि तदधुनाऽकाशवाणीकृपातः ॥

(४४)

अन्वयः—वृषभसहिताः (कर्षन्तः) द्वित्राः (एव) कर्षकाः सीरलग्नाः, दृष्टाः । प्रायः, कृषिविरचने, यन्त्रगोदारणानि, अभूवन् । सरसमधुरम्, दोलागीतम् क्वापि, न, श्रूयते एव, अधुना, यदि, इदम्, तद्, आकाशवाणीकृपातः, श्रूयते ।

(४४)

अर्थ—अपने बैलों को साथ ले दो तीन कृषक ही हल से (जुताई करने में) लगे हुए थे, प्रायः खेती वाड़ी के कार्य में अब यान्त्रिक हलों (ट्रैक्टरों) का उपयोग होने लगा है । (अब पहिले की भाँति) रसीले और मीठे (नारी स्वरों में) हिंडोले गीत कहीं भी तो सुनाई नहीं पड़ते । अब ये यदि कभी सुनाई पड़ते भी हैं तो आकाशवाणी की कृपा से ही (ऐसा संभव हो पाता है ।)

[४५[

सोऽयं देशः प्रथितविदिशाराजधान्या दशार्णः,
निःश्रीको हा विगतविभवो दीनहीनो हि जातः।
दृष्ट्वा दृष्ट्वा प्रतनुसलिलां वेत्रवत्याश्च धारां
दुर्भाग्यं स्वं विकलमनसा भावयन् रोदितीव ॥

(४५)

अन्वयः—हा ! सोऽयं प्रथितविदिशाराजधान्याः दशार्णः देशः, निःश्रीकः, विगतविभवः दीनहीनः (च) जातः हि । (अयम्) वेत्रवत्याः, प्रतनुसलिलां, धारां, च दृष्ट्वा, विकलमनसा, स्वं, दुर्भाग्यं, भावयन् रोदिति, इव (लक्ष्यते)।

(४५)

अर्थः—(अतीत में) विदिशा नाम की प्रसिद्ध राजधानी वाला यह (महान्) दशार्ण देश अब अपने धन धान्य और शोभा को खो कर दीन हीन हो गया है। यह (अपने पास वह रही) वेतवा की जल की स्वल्पता के कारण क्षीण धारा को देख कर व्याकुल मन से इसे अपना दुर्भाग्य मानता हुआ रोता सा प्रतीत होता है।

[४६]

ख्यातं वैद्यं रमणरहिता दुर्बला वीर्यहीनाः,
दाशार्णास्ते रसिकयुवका नित्यमन्वेषयन्ति ।
वेश्यास्ता हा ! पुलिसभयतस्त्यक्तदेशाः प्रयाताः,
दूरं याता परिमलकथा सन्निकर्षेण यूनाम् ॥

(४६)

अन्वयः—ते, दाशार्णाः रसिकयुवकाः, (सम्प्रति) दुर्बलाः, वीर्यहीनाः (अतः) रमणरहिताः (सन्तः) नित्यम्, ख्यातं, वैद्यम्, अन्वेषयन्ति । ताः वेश्याः (च) पुलिसभयतः, त्यक्तदेशाः (सत्यः) प्रयाताः । यूनां, सन्निकर्षेण, परिमलकथा, दूरं, याता ।

(४६)

अर्थ—हा ! दशार्ण (देश) के वे (प्रसिद्ध) रसिक युवक (जिनके उद्दाम यौवन की महाकवि कालिदास द्वारा प्रशंसा की गयी थी) अब बल और वीर्य से हीन होकर अपनी रतिशक्ति खो चुके हैं। इन दिनों वे नित्य ही (अपनी खोई हुई शक्ति को पुनः पाने के लिए) किन्हीं प्रसिद्ध वैद्य (कविराज) को खोजने में लगे रहते हैं। वे वेश्याएँ (जिनके सौन्दर्य का उन्हीं महाकवि कालिदास ने रोचक वर्णन किया है) पुलिस के भय से इस स्थान को छोड़कर (यहाँ से) दूर चली गयी हैं। युवकों के अंगराग की सुगन्ध (से पत्थर भी महकने लगते थे, इस) की चर्चा भी तो अब (बीते युग की बात होकर) बहुत दूर जा पहुँची।

[४७]

रेवा खिन्ना प्रतिदिनमहो बन्धकृद्भिर्विबद्धा,
ठेकेदारैः परमनुदिनं छिद्यते काननं तत् ।
सीमेण्टार्थं कणविरचने यन्त्रशालाऽसुरीभिः,
तुङ्गो विन्ध्यो व्यथितहृदयश्चूर्ण्यते पिष्यते च ॥

(४७)

अन्वयः—हा, प्रतिदिनम्, बन्धकृद्भिः, विबद्धा, रेवा, खिन्ना (आस्ते) परम्, अनुदिनम्, ठेकेदारैः, तत्, काननं, छिद्यते, यन्त्रशालासुरीभिः, सीमेण्टार्थम्, कणविरचने, तुंगः, विन्ध्यः व्यथितहृदयः (भवन्) चूर्ण्यते, पिष्यते, च ।

(४७)

अर्थः—अहो ! प्रतिदिन बाँध लगाने वाले पुरुषों के द्वारा बाँध लगाई गई रेवा नदी (धीमे धीमे बहती) उदास सी दिखलाई पड़ती है। इतना ही नहीं, ठेकेदारों के द्वारा प्रतिदिन (यहाँ का) घना बन काटा जा (कर नष्ट हो) रहा है। यहाँ राक्षसी जैसी (विशाल) आकार की फैक्टरियों के द्वारा सीमेण्ट के लिए (पत्थर का) कण बनाने के कार्य में ऊँचा (एवम् गौरवशाली) विन्ध्य पर्वत चूर चूर करके (बारीक) पीसा जा रहा है। इस (दुष्कृत्य) से इस पर्वत का हृदय अत्यन्त पीड़ित (या छलनी छलनी) हो रहा है।

[४८]

गच्छन्तीनां प्रियतमगृहं सौम्य यासामभूवम्,
विद्युद्भासा, सरलविधिना मार्गकृत्सुन्दरीणाम् ।
मालव्यस्ता मधुरवदनाश्चारुहासे प्रसिद्धाः,
मुम्बय्यां हाऽभिनयकुशलास्तारिका हन्त जाताः ।।

(४८)

अन्वय—सौम्य ! प्रियतमगृहं गच्छन्तीनां, यासां, सुन्दरीणाम् विद्युद्भासा, सरलविधिना, (अहम्) मार्गकृत्, अभूवम् । हा हन्त ! मधुरवदनाः, चारुहासे, प्रसिद्धाः, ताः, मालव्यः, मुम्बय्याम् अभिनय-कुशलाः, तारिकाः, जाताः ।

(४८)

अर्थ—हे स्नेही मित्र ! (वर्षा ऋतु में, रात्रि के समय) अपने प्रियतम के घर (अभिसार करने) जा रही जिन सुन्दरियों का बिजली चमकाने जैसी सरलविधि से मैं (मेघ) मार्गदर्शक हुआ करता था, अपनी मुखाकृति के माधुर्य एवम् (शुभ्रदन्तपंक्ति के कारण) सुन्दर हँसी के लिए प्रसिद्ध मालव देश की वे ही सुन्दरियाँ अब (अपने प्रियतम को त्याग कर) बम्बई में अभिनय कला में कुशल (सिनेमा की) अभिनेत्रियाँ हो गयीं हैं। हा ! यह क्या हो गया !

[४९]

भग्ना मार्गा मलिनमलिनाः पंकिलाः पूतिवाताः,
दृश्यन्ते च घृणिततनवः शूकरा वीथिकासु ।
शिप्रा जाता विगतजलजा दूषितापेयनीरा,
तस्या वातः प्रियतम इवाभाति नोऽवन्तिकायाम् ॥

(४९)

अन्वयः—अवन्तिकायाम् भग्नाः, मलिनमलिनाः, पंकिलाः पूतिवाताः, मार्गाः, वीथिकासु, च घृणिततनवः, शूकराः, दृश्यन्ते । शिप्रा दूषितापेयनीरा (अतः) विगतजलजा (च) जाता, । तस्याः वातः (अधुना) प्रियतमः इव, नो, आभाति ।

(४९)

अर्थ—(आज की) उज्जयिनी नगरी में सड़कें (मरम्मत न होने के कारण) टूटी फूटी (नियमित झाड़ न लगने के कारण) बहुत गन्दी (नालियों के रुक जाने के कारण) कीचड़ से भरी हुई तथा (स्थान स्थान पर कूड़े के ढेर लगे होने के कारण) दुर्गन्ध से परिपूर्ण हैं। यहाँ की गलियों में (विष्टा और कीचड़ में सने हुये) घिनौने शरीर वाले सुअर (बेरोकटोक घूमते) दिखलाई पड़ते हैं। (यहाँ की) शिप्रा नदी में कमल भी नहीं रहे तथा उसका जल भी दूषित होने से पेय नहीं रहा। सवेरे (शीतलता और सुगन्ध के अभाव में) शिप्रा का वायु भी अब प्रियतम सा नहीं प्रतीत होता।

[५०]

वर्षे वर्षे नगरकृतिनो देवतोत्थानवत्या-
मेकादश्यां विपुलविदुषां मेलनं योजयन्ते ।
तस्मिंस्तुत्वा कविकुलगुरुं श्रद्धया कालिदासं,
काव्यालापैरमृतमधुरैः सादरं संस्मरन्ति ॥

(५०)

अन्वयः—वर्षे, वर्षे, नगरकृतिनः, देवतोत्थानवत्याय्, एकादश्याम्, विपुलविदुषां, मेलनं, योजयन्ते । तस्मिन्, कविकुलगुरुं, कालिदासं श्रद्धया, स्तुत्वा, अमृतमधुरैः, काव्यालापैः (च तं) सादरं, संस्मरन्ति ।

(५०)

अर्थ—प्रतिवर्ष इस (उज्जैन) नगर के विशिष्ट नागरिक देवोत्थान एकादशी के दिन अनेक विद्वानों का सम्मेलन आयोजित करते हैं। इस सम्मेलन में वे कविकुल गुरु कालिदास की श्रद्धापूर्वक प्रशंसा करते हुए अमृतसदृश मधुर काव्य-चर्चाओं से उनका सादर स्मरण करते हैं।

[५१]

"पुर्यामस्यां विलसति पुरश्चैकतो भैरवोऽय-
मम्बा साक्षाद् दिशति विभवं सा गढे कालिकाख्ये।
कृष्णः पूर्वं स्वगुरुभवने सर्वशास्त्राण्यशिक्षत्"-
इत्यागन्तून् रमयति जनोऽद्यापि चावन्तिकोऽत्र ॥

(५१)

अन्वय—अस्यां, पुर्याम्, एकतः, अयम्, भैरवः, पुरः, विलसति (अपरतः) कालिकाख्ये गढे, सा, अम्बा साक्षात् (वसन्ती) विभवं, दिशति । पूर्वम्, स्वगुरुभवने, (वसन्) कृष्णः, च सर्वशास्त्राणि, अशिक्षत् इति, आवन्तिकः, जनः, अद्यापि, अत्र, आगन्तून्, रमयति ।

(५१)

अर्थ—इस (उज्जयिनी) नगरी में एक ओर ये भैरव जी सामने ही (प्रत्यक्ष) निवास करते हैं, तो दूसरी ओर कालिकागढ़ में प्रसिद्ध जगदम्बा देबी साक्षात् विराजमान रहकर (भक्तों को) धन-धान्य प्रदान करती हैं। यहीं प्राचीन काल में अपने गुरु (ऋषि सान्दीपनि) के घर निवास करते हुए भगवान् कृष्ण ने सभी शास्त्रों की शिक्षा प्राप्त की थी। इस प्रकार आज भी अवन्ती के लोग यहाँ आने वाले भ्रमणार्थियों को (बतला कर) प्रसन्न करते हैं।

[५२]

अम्भोविन्दूंस्तुहिनसदृशान् वर्षितुं सम्प्रवृत्तम्,
दृष्ट्वा मां तैरधिकृतजनैर्घोषितश्चावकाशः।
रेनीडेऽन्तर्भवति सुखिनोऽप्यन्यथावृत्ति चेतः,
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥

(५२)

अन्वयः—तैः, अधिकृतजनैः, च, तुहिनसदृशान्, अम्भोविन्दून् च वर्षितुम्, सम्प्रवृत्तम्, मां, दृष्ट्वा, अवकाशः, घोषितः। सुखिनः, अपि, चेतः, रेनी डे ऽन्तः, कण्ठाश्लेषप्रणायिनि, जने अन्यथावृत्ति, भवति, पुनः (तस्मिन्) दूरसंस्थे किम् (न भवति)।

(५२)

अर्थ—वहाँ (उस उज्जयिनी नगरी में) अधिकारी जनों ने मुझे ओस जैसी जल की बूँदों को बरसाने में संलग्न देखकर अवकाश घोषित कर दिया। वर्षा के दिन में तो (अपनी पत्नी के पास रह रहे) संयोगी पुरुष का भी मन कण्ठालिंगनयोग्य (प्रियतमा) के प्रति उत्सुक हो जाता है। पुनः यदि वह दूर हो तो उसके प्रति उत्सुकता के विषय में कहना ही क्या ?

[५३]

एकं दृश्यं सुभगसुखदं तत्र दृष्टं मयेद-
मुष्णं चायं ललितकपिशं बिस्कुटैः संगमय्य ।
वर्षाकाले सुखदपवने बन्धुमित्रै रसज्ञैः,
सार्द्धं सर्वं लघुनि चषके नन्दिताः सिप्सिपन्ति ॥

(५३)

अन्वयः—तत्र, मया सुभगसुखदम्, इदम्, एकम्, दृश्यम्, दृष्टम् (यत्) सुखदपवने, वर्षाकाले, सर्वे, लघुनि चषके, ललितकपिशम्, उष्णम्, चायम्, बिस्कुटैः संगमय्य, रसज्ञैः बन्धुमित्रैः सार्द्धम् नन्दिताः (सन्तः) सिप्सिपन्ति ।

(५३)

अर्थः—मैंने वहाँ (उस उज्जयिनी नगरी में, प्राचीन काल के दृश्य से पूर्णतया भिन्न) एक सुन्दर और सुखद दृश्य देखा कि अधिकांश (नगरवासी) जन वर्षाकाल में (जब पानी बरस रहा होता) और सुखद शीतल वायु के झकोरों (का क्रम चल रहा होता, तब ऐसे सहावने क्षणों) में छोटे-छोटे प्यालों में (उंडेली गयी) सुन्दर कत्थई रंग की गरम-गरम चाय को अपने प्रिय रसिक बन्धुजनों के साथ हर्षित होते हुये सिप करते हैं ।

[५४]

दोर्घीकुर्वन् कटुकलकलं वाहनानां समन्ता-
च्चाहोरात्रं भुवि तरलयन् क्षुद्रपेट्रोलगन्धम् ।
तत्र स्त्रीणां हरति सुरतग्लानिमद्यापि सद्यः
पंखावातः प्रियतम इव प्रार्थनाचाटुकारः ॥

(५४)

अन्वयः—तत्र, अद्यापि, समन्तात्, वाहनानां, कटुकलकलं, दोर्घीकुर्वन् भुवि च, अहोरात्रम्, क्षुद्रपेट्रोलगन्धम्, तरलयन्, पंखावातः प्रार्थनाचाटुकारः, प्रियतम इव, स्त्रीणां, सुरतग्लानिं, सद्यः, हरति ।

(५४)

अर्थ—उस अवन्ती नगरी में आज भी चारों ओर से उठ रहे वाहनों के कटु कलकल शब्द की वृद्धि करता हुआ तथा दिन रात विषैली पैट्रोल की गन्ध की पृथ्वी मण्डल पर विखेरता हुआ (बिजली के) पंखे से उद्भूत वायु रति याचना के लिए मधुभाषी प्रियतम की भाँति स्त्रियों की भोगजन्य थकान को शीघ्र दर करता है ।

[५५]

कर्ता भर्ता सकलजगतां चापि हर्ता य आस्ते,
शिप्रातीरे निवसति गणैर्यो महाकालनामा ।
तं प्राप्तोऽहं प्रणतिमनसा सान्ध्यकाले पवित्रे,
तत्रार्तिक्यं नयनफलदं वीक्ष्य धन्यो ह्यभूवम् ॥

(५५)

अन्वयः—य, सकलजगतां, कर्ता भर्ता तथा अपि च हर्ता आस्ते, यः (च) महाकालनामा (सन्) शिप्रातीरे, गणैः निवसति, अहम्, पवित्रे, सान्ध्यकाले प्रणतिमनसा, तं प्राप्तः, तत्र, नयनफलदम्, आर्तिक्यं, वीक्ष्य धन्यः, अभूवम्, हि ।

(५५)

अर्थः—जो समस्त संसार के कर्त्ता, भर्त्ता तथा संहर्ता हैं तथा जो महाकाल के नाम से शिप्रा नदी के तट पर अपने गणों समेत निवास करते हैं, उन्हें प्रणाम करने की इच्छा से मैं पवित्र सन्ध्या काल में उनके निकट उपस्थित हुआ तथा वहाँ पर नेत्रों को सफल करने वाली (उनकी) आरती देखकर निश्चय ही धन्य हुआ ।

[५६]

सर्वं विश्वं विपरिणमयंच्छङ्करः स्वीयशक्त्या,
एको देवः प्रकटमहिमा स स्वभूरुज्जयिन्याम् ।
आस्ते शिप्राशुभजलकणैः धौतलिंगः प्रसन्नः,
पूर्णीकुर्वन् सकलजनताकामनानल्पपात्रम् ॥

(५६)

अन्वयः—उज्जयिन्याम्, सः एकः, देवः प्रकटमहिमा, स्वभूः शंकरः, स्वीयशक्त्या, सर्वं, विश्वं, विपरिणमयन् शिप्राशुभजलकणैः धौतलिंगः, प्रसन्नः (सन्) सकलजनता-कामनानल्पपात्रं, पूर्णीकुर्वन्, आस्ते ।

(५६)

अर्थः—उज्जयिनी नगरी में वह एकमात्र देव, प्रकट महिमाशाली, स्वयम्भू शंकर अपनी शक्ति से सारे संसार को संचालित करते हुए, शिप्रानदी के शुभजलकणों से स्नान कराये जाने पर प्रसन्न होकर अपने समस्त भक्तों के याचनाओं के विशाल पात्र (मनोरथ) को परिपूर्ण करते हुए निवास करते हैं ।

[५७]

रम्यं दृश्यं नयनसुखदं तत्र रुद्राभिषेके,
विद्वद्वृन्दैर्मुखरितदिशैर्मन्त्रपाठैः पवित्रम् ।
दृष्टं, शैवी परमरमणी पद्धतिः संश्रुता च
धन्यश्चाहं मुदितमनसा श्रद्धया तं ननाम ॥

(५७)

अन्वयः—तत्र, रुद्राभिषेके, नयनसुखदं, विद्वद्वृन्दैः, मुखरित-दिशैः, मन्त्रपाठैः, पवित्रं, रम्यं दृश्यम्, दृष्टम्, परमरमणी, शैवी, च पद्धतिः संश्रुता । (इत्थम्) धन्यः च, अहम्, मुदितमनसा, श्रद्धया तं, ननाम ।

(५७)

अर्थ—वहाँ (उज्जयिनी नगरी में) मैंने विद्वद्गणों द्वारा उच्च-ध्वनि से किये जा रहे (वेद) मंत्रों के पाठों से पवित्र तथा नेत्रों को सुख देने वाले रुद्राभिषेक का दृश्य देखा और अतिशय प्रिय लगने वाली शैवी पद्धति को भी सुना । (इस प्रकार) मैं धन्य हो गया, और (तब) मैंने प्रसन्न मन से श्रद्धा पूर्वक उन (रुद्रदेव) को प्रणाम किया ।

[५८]

अद्यावन्त्यामुदयनकथाकोविदा नैव वृद्धाः,
जागर्तीयं तदपि नगरी श्रीनिवासैं रथैः कौ ।
नूनं जातः कविकुलगुरुः कालिदासः पुनः सः,
पूर्णे देशे ललितकविता गीयते यस्य नित्यम् ।।

(५८)

अन्वयः—अद्य, अवन्त्याम्, उदयनकथाकोविदाः, वृद्धाः नैव (सन्ति) तदपि, इयं, नगरी, श्रीनवासैः, रथैः कौ, जागर्ति । कविकुलगुरुः, सः नूनं जातः यस्यः, नित्यं, ललितकविता, पूर्णे, देशे, गीयते ।

(५८)

अर्थः—आज की अवन्ती नगरी में उदयन की कथा के ज्ञान वृद्ध जन नहीं हैं तथापि यह नगरी अपने शोभामय वाहनों से पृथ्वी पर जागृत (प्रसिद्ध) है। (उन वाहनों की मधुर ध्वनि से ऐसी प्रतीत होती है कि मानो कविकुलगुरु कालिदास यहाँ पुनः उत्पन्न हुए हों और उनकी मधुर कविता प्रतिदिन (प्रतिक्षण) सम्पूर्ण प्रदेश में गायी जा रही हो ।

(५८)

ध्वनिः—तथापि यह नगरी (प्रसिद्ध कवि श्री निवास जी रथके द्वारा पृथ्वी मण्डल पर अपना महत्त्व बनाये हुए है) ऐसा प्रतीत होता है मानो उनके रूप में कविकुलगुरु कालिदास ने पुनः जन्म लिया हो जिनकी मधुर कविता नित्य सम्पूर्ण देश में (प्रेम से) गाई जाती है ।

[५९]

जातो वंशे भुवनविदिते गुह्यकानां पवित्रे,
भाग्येनैतद् धनदवचसा विप्रयुक्तस्त्विदानीम् ।
एकान्ते त्वं जनकतनयापाविते पर्वतेऽस्मिन्
बन्धो शान्त्या गमयसि दिनान्युत्पथान् वर्जयित्वा ।।

(५९)

अन्वयः—हे बन्धो ! गुह्यकानां, भुवनविदिते पवित्रे, वंशे, जातः (असि) इदानीम्, धनदवचसा, विप्रयुक्तः, एतत्, तु भाग्येन । त्वम् जनकतनयापाविते, अस्मिन्, पर्वते, उत्पथान्, वर्जयित्वा, एकांते शांत्या, दिनानि, गमयसि ।

(५९)

अर्थः—हे बंधु, यक्षों के लोकप्रसिद्ध पवित्र वंश में तुम उत्पन्न हुए हो किंतु इस समय जो कुबेर के (शाप) वचन से (पत्नी) से वियुक्त हो गये हो, यह सब तो भाग्यवश है । (इस पर भी संतोष है कि) तुम देवी सीता के (संचरण) द्वारा पवित्र इस (रामगिरि)पर्वत पर कुमार्गों का त्याग कर एकांत में शांति से दिन बिता रहे हो ।

[६०]

मानं कृत्वा विहरसि सखे साम्प्रतं त्वं युगेऽस्मिन्,
मूर्खं मत्वा सकलमनुजास्तादृशं त्वां त्यजन्ति ।
वाचालः सन् प्रतिदिनमतश्चाटुकारो भवेः भोः,
मौनी नित्यं भवति हिलघुश्चाटुकृद् गौरवाय ॥

(६०)

अन्वयः—सखे! अस्मिन्, युगे, त्वं, साम्प्रतं, मानं, कृत्वा, विहरसि तादृशं, त्वाम् सकलमनुजाः मूर्खं, मत्वा, त्यजन्ति । भोः अतः (त्वम्) प्रतिदिनम्, वाचालः, सन्, चाटुकारः, भवेः । हि मौनी नित्यं, लघुः, भवति, चाटुकृत् (च) गौरवाय (भवति) ।

(६०)

अर्थ—हे मित्र ! इस (विषम) युग में तुम इस समय अपने मान का ध्यान रखते हुये (दूसरों से दूर) रहते हो किन्तु तुम जैसे मानशील को तो सभी मनुष्य मूर्ख समझ कर त्याग रहे हैं । (उत्सव आदि में तुम्हें आमिन्त्रत नहीं करते अथवा अन्य सामाजिक अवसरों पर तुम्हारी उपेक्षा करते हैं) अतः हे मित्र, तुम (अब से) प्रतिदिन (अधिकारियों की लम्बी चौड़ी प्रशंसा में) वाचाल होते हुए (उनके) चाटुकार बनो । क्योंकि (अब यही सच है) कि मौन रहने वाला नित्य ही अपमान पात्र बनता है और चाटुकार को गौरव दिया जाता है ।

[६१]

श्रुत्वा सर्वं विकृतचरितं भारतस्य प्रजायाः
खिन्नो यक्षो विनतवदनो मौनमेवाललम्बे ।
उद्भूतो हा तरलपवनस्तत्क्षणं पर्वताग्रे,
क्षुद्रो मेघो गगनविवरे लज्जितो येन लीनः ॥

(६१)

अन्वयः—भारतस्य, प्रजायाः, सर्वं, विकृतचरितं, श्रुत्वा, खिन्नः, यक्षः विनतवदनः (सन्) मौनम्, एव, आललम्बे । हा, तत्क्षणं, पर्वताग्रे, तरलपवनः उद्भूतः क्षुद्रः मेघः, लज्जितः (सन्) गगनविवरे, लीनः ।

(६१)

अर्थ—भारतवर्ष की प्रजा का दोषमय सम्पूर्ण चरित्र सुनकर दुःखी यक्ष नीचे को मुख कर मौन हो गया । हा, (दैववश) उसी क्षण (रामगिरि) पर्वत पर तीव्र वायु चलने लगा जिससे वह अल्पकाय मेघ लज्जित होकर मानो आकाश रूपी गुहा में छिप गया ।

[६२]

इच्छारामो यदपि चकितं दृश्यमेतल्लुलोके,
मेघोक्तानां विविधवचसां साक्षिताञ्च प्रपेदे ।
मत्तः सर्वं तदिह गदितं बान्धवाः संशृणुध्वम्,
सर्वश्चेष्टं जगति लभतां तादृशं भो यतध्वम् ॥

(६२)

अन्वयः—इच्छारामः, यत्, अपि एतत्, दृश्यं, चकितं, लुलोके, मेघोक्तानां विविधवचसां, च साक्षितां, प्रपेदे । भो बान्धवाः ! इह तत् सर्वं गदितं, मत्तः, संश्रृणुध्वम् । जगति च सर्वः इष्टं लभतां, तादृशं, यतध्वम् ।

(६२)

अर्थ—(कवि) इच्छाराम ने जो भी यह दृश्य आश्चर्य चकित होकर देखा, तथा मेघ द्वारा कहे हुए जिन अनेक वचनों का वह साक्षी बना । हे भाइयो, इस सब कथन को आप यहाँ मुझसे सुनें तथा संसार में प्रत्येक प्राणी अपनी प्रिय वस्तु को प्राप्त करे, इस प्रकार का यत्न करें ।

कवि-परिचयः

नाम : डा० इच्छाराम द्विवेदी

पितृनाम : आचार्यश्रीलालविहारी द्विवेदी

जन्म : अक्षयनवमी सं २०१६

जन्मस्थानम् : इटावा (उ० प्र०)

शिक्षा : पुराणाचार्यः (स्वर्णपदकी) (सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयतः) एम०ए० संस्कृते (जीवाजी विश्व विद्यालयतः) पी-एच० डी० (राष्ट्रिय संस्कृतसंस्थानतः)

सम्प्रति : मैनपुरीस्थ—श्रीएकरसानन्द - संस्कृत- महाविद्यालये पुराणेतिहास-विभागाध्यक्षः, मैनपुरीस्थ —सुरभारती-सेवा संस्थानस्य संस्थापकमहासचिवः

प्रणीता ग्रन्था : दूतप्रतिवचनम् (काव्यम्) इतिहासपुराणकाव्यादिषु नलचरित्रस्य समीक्षात्मकमध्ययनम् शोधप्रबन्धः (शीघ्रं प्रकाश्यः) टूटती रूढ़ियाँ (हिन्दी उपन्यासः) स्फुट रचना आकाशवाण्या दूरदर्शनाच्च प्रसारिताः।

आवाससंकेत : 167/12 पंजाबी कालोनी, मैनपुरी
(उ० प्र०) 205001

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	रु० ५०.००
२.	श्रीनेहरूवृत्तम् (आचार्य रमेशचन्द्र शुक्लः)	रु० १५.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा०स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
९.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ४०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१४.	संस्कृतसाहित्य में राष्ट्रियभावना (डा०हरिनारायणदीक्षित)	रु०१५०.००
१५.	दयानन्दसूक्तिसप्तशती (श्री शिव कुमार मिश्रः)	रु० १५.००
१६.	गान्धिसूक्तिशप्तशती (,, ,,)	रु० १५.००
१७.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् (,,) (,,)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० मी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०००
२७.	नियतिचक्रम् (ध्वनिनाटकम्) (,, ,,)	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा०रामकिशोर मिश्रः)	रु० १२.००
२९	लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००
३१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
३२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३३.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
३४.	ऋतम् (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.